Total Pages—4

# UG/II/SANS/H/V/18(New)

## 2018

## SANSKRIT

## [ Honours ]

## PAPER – V

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

1. वैदिकदेवतारूपेण इन्द्रदेवताया माहात्म्यमुपस्थाप्यताम् । 10

*अथवा*

दाशतय्यां हिरण्यगर्भसूक्तस्य दार्शनिकतत्त्वं स्फुटीक्रियताम् ।

2. सायणभाष्यरीत्या सुरगिरा देवनागर्यां लिप्यां च कस्यचिदेकस्य मन्त्रस्य व्याख्या ऋषि-च्छन्दोदेवतानिर्देशपुरःसरं कार्या — 6

(*i*) अग्ने यं यज्ञमध्वरं
विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ।।

( *Turn Over* )

(*ii*) य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवा: ।
यस्य छायामृतं यस्य मृत्यु :
कस्मै देवाय हविषा विधेम ।।

3. अधस्तनयो: काचिदन्यतरा भाष्यपङ्क्ति: सुरगिरा देवनागर्य्या लिप्या च व्याख्येया — 6

(*i*) तस्मिन् सूक्तेप्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोग: ।

(*ii*) आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि ।

4. No.2 प्रश्नस्थितयो: मन्त्रयो: कस्यचिदेकस्य मन्त्रस्य पदपाठ: साधनीय: । 4

5. अधोलिखितानां पदानां यथेप्सितं द्वयो: व्याकरणगता टिप्पणी कार्या —

एमसि, पिपृता, अपधा, कस्मै । $2 \times 2$

6. मनुमतृस्यकथायां निहितस्य आख्यानभागस्य सामाजिकतात्पर्य्यं विवृणुत । 5

7. (क) सम्भूति: का ? असम्भूति: वा का भवति ? ईशोपनिषदनुसारं सम्भूत्यसम्भूत्यो: स्वरूपं प्रतिपादनीयम् । 10

*अथवा*

मन्त्रोपनिषद् का भवति ? तस्या: उपनिषद: शिक्षा सदृष्टान्तं पर्यालोचनीयम् ।

(ख) अधोलिखितयोः मन्त्रयोः कस्यचिदेकस्य व्याख्या सुरगिरा देवनागरलिप्या च कार्या — 6

(i) असुर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ।।

(ii) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।

(ग) अधोनिर्दिष्टेषु यथेच्छं चतुर्णां समाधानं सुरगिरा देवनागरीं लिपिमाश्रित्य च विधेयम् — 1 × 4

(i) ऋषिशब्दस्य का व्युत्पत्तिः ?

(ii) श्लोकमन्त्रयोः को भेदः ?

(iii) ऋचि कति शाखा विद्यन्ते ? नामग्राहं काः शाखाः प्राप्यन्ते ?

(iv) सूर्यस्य वाहनस्य किं नामधेयम् ?

(v) निरुक्ते कति देवता अङ्गीक्रियन्ते ?

(vi) शाखाचरणयोः को भेदः ?

8. (क) कस्यचिदेकस्य प्रश्नस्य समाधानं कार्यम् — 10

(i) वैदिकसाहित्ये तुमुन्प्रत्ययस्य सप्रयोगं रूपाकृतिः प्रदर्शनीया ।

(ii) वैदिकधातुरूपाणां वैचित्र्यं सोदाहरणं निरूप्यताम् ।

(ख) ससूत्रं यथेच्छं द्वयो: व्याकरणदिशा स्वरसाधनप्रक्रिया प्रदर्शनीया – $2\frac{1}{2}\times 2$

देवाँ एह, मामहन्ताम्, विश्वत:, यदेद्युक्त ।

9. ब्राह्मणसाहित्यस्य गुरुत्वं प्रतिपाद्यताम् । 10

*अथवा*

वेदाङ्गानामुत्सं पर्यालोच्य तेषां क्रमविकाशः निरूप्यताम् ।

10. (क) कस्यचिदेकस्य टिप्पणी कार्या – 5 × 1

प्रातिशाख्यम्, यास्काचार्य:, शतपथब्राह्मणम्, पञ्चविंशब्राह्मणम् ।

(ख) अधस्तनेषु यथेप्सितं पञ्चानां समाधानं सुरगिरा देवनागर्य्या लिप्या च विधेयम् – 1 × 5

(*i*) सूक्तविनियोग: कस्तावदुच्यते ?

(*ii*) अग्ने: कानि विशेषणानि वर्तन्ते ?

(*iii*) धात्यखरित: को नाम ?

(*iv*) अनुवाक्याया नामान्तरं किमर्थं विधीयते ?

(*v*) किं नाम आरण्यकं संज्ञायते ?

(*vi*) का नाम अनुक्रमणिका ?